# प्रथमः खण्डः

## प्रथमः पाठः
## मङ्गलाचरणम्

वेदोपनिषत्तः

अस्माकं भारतीयसंस्कृतिः मङ्गलमयी अस्ति। अत्र सर्वेषां कार्याणां निर्विघ्नसमाप्तये मङ्गलाचरणं भवति। अत एव अध्यापने संलग्नानां गुरूणाम्, अध्ययने तल्लीनां छात्राणां मङ्गलकारिमन्त्राणां ज्ञानाय स्मरणाय च मङ्गलाचरणपाठः अत्र प्रस्तुतः।

प्रथमः मन्त्रः ऋग्वेदस्य प्रथमण्डलस्य प्रथमसूक्तात् उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः विश्वामित्रः हविदातृ–यजमानाय कल्याणार्थं अग्निदेवं प्रार्थयति। अस्य मन्त्रस्य ऋषिः विश्वामित्रः, देवता अग्निः छन्दश्च गायत्री।

द्वितीयः मन्त्रः ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात् (१९१ सूक्तम्) उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः संवननः सर्वजनानां मध्ये सहकारभावनायाः विकासार्थं परस्परविरोधनिराकरणार्थं च आवाहनं करोति। तृतीयः मन्त्र ऐतरेयोपनिषदः शान्तिपाठात् उद्धृतः अस्ति। अस्मिन् मन्त्रे सर्वविघ्नानां शान्तये परमात्मा प्रार्थितः। वाङ्मनसोरेकरूपता भवतु–इति कामना च कृता।

चतुर्थः मन्त्रः तैत्तिरीयोपनिषदः शिक्षावल्याः द्वादशानुवाकतः उद्धृतः अस्ति। अयं मन्त्रः ऋग्वेदस्य १/९ मण्डले, यजुर्वेदस्य ३६/९ स्थले अथर्ववेदस्य १९/ ९/ ६ स्थलेऽपि उल्लिखितः अस्ति। अत्र प्रार्थना अस्ति यत् परमेश्वरः कल्याणं करोतु। गुरुशिष्याणां लक्ष्यप्राप्तौ निर्विघ्नतां करोतु।

पञ्चमो मन्त्रः कठोपनिषदः शान्तिपाठात् सङ्कलितः अस्ति। अत्र सहकारभावनया सह उत्कृष्टसामर्थ्यप्राप्तेः अपि कामना अस्ति।

१. यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
त्वेत्तत्सत्यमङ्गिरः ।। (ऋग्वेदस्य प्रथमण्डलस्य अग्निसूक्तात्)

२. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।। (ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात्)

३. ॐ वाङ्. मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्मे एधि।
वेदस्य मे आणीस्थः श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारमवतु वक्तारम्।
(ऐतरेयोपनिषदः शान्तिपाठात्)

४. ॐ शं नो मित्रः वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पति ः।
शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। (ऋग्वेदः १/ ९० / ९ तैत्तिरीयोपनिषदः)

५. ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः। शान्तिः।। शान्तिः।। – (कठोपनिषदः शान्तिपाठात्)

❀ ❀ ❀

## अन्वयः–

१. अङ्ग अग्ने। यत् त्वम् दाशुषे भद्रम् करिष्यसि, तव तत् इत्। अङ्गिरः सत्यम्।

२. यथा पूर्वे सञ्जानाना देवाः भागं उपासते (तथा यूयम्) संगच्छध्वं, संवदध्वं, वः मनांसि सञ्जानताम्।

३. ॐ मे वाक् मनसि प्रतिष्ठिता, मे मनः वाचि प्रतिष्ठितम् आविः मे आवीः एधि। मे वेदस्य आणीस्थः मे श्रुतं मा प्रहासीः। अनेन अधीतेन अहोरात्रान् संदधामि ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। वक्तारम् अवतु।

४. ॐ नः मित्रः वरूणः शम्। अर्यमा नः शम् भवतु। नः इन्द्रः शम् बृहस्पतिः (शम् भवतु) उरुक्रमः विष्णुः नः (शं भवतु)। ब्रह्मणे नमः। वायो ते नमः। त्वम् एव प्रत्यक्षं ब्रह्म असि। त्वाम् एव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। अवतु माम्। अवतु वक्तारम्।

५. ॐ नौ सह अवतु। नौ सह भुनक्तु। सह वीर्यं करवावहै।
नौ अधीतम् (ज्ञानम्) तेजस्वि अस्तु (भवतु)। मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः।

## शब्दार्थाः

| | | |
|---|---|---|
| **दाशुषे** | = | हविदातृयजमानाय (हवि का दान करने वाले यजमान के लिए) |
| **भद्रम्** | = | कल्याणकारिपदार्थः |
| **अङ्ग अग्ने** | = | हे अग्नि देव |
| **अङ्गिरः** | = | ऋषि विशेषः (अङ्गारमुनि को जन्म देने वाले अग्नि देव) |
| **तत्** | = | तत्कल्याणकारिसर्वपदार्थं (वे सत् कल्याणकारी पदार्थ) |
| **पूर्वे** | = | पूर्वस्य (पहले के) |
| **सञ्जानाना** | = | सम्यक् प्रकारेण ज्ञात्वा (अच्छी प्रकार से जानते हुए) |
| **भागम्** | = | स्वकीयांशम् (अपने अंश को) |
| **उपासते** | = | स्वीकारं कुर्वन्ति (स्वीकार करते हैं) |
| **संगच्छध्वं** | = | सहैव गन्तव्यम् (साथ मिलकर चलो) |
| **संवदध्वं** | = | सहैव वक्तव्यम् (साथ मिलकर बोलो) |
| **मनांसि** | = | चित्तेषु (विचार अथवा चिन्तन, चित्त) |
| **सञ्जानताम्** | = | विज्ञानताम् (ठीक प्रकार से जाने ) |
| **ॐ** | = | हे सच्चिदानन्द परमात्मन् |
| **प्रतिष्ठिता** | = | स्थिता |
| **वाचि** | = | वागिन्द्रिये, वाण्याम् |
| **प्रतिष्ठितम्** | = | सुस्थितं भवतु |
| **आविः** | = | हे प्रकाशस्वरूप परमेश्वर |
| **आवीः एधिः** | = | त्वं प्रकटितो भव |
| **वेदस्य** | = | ज्ञानस्य |
| **आणीस्थः** | = | आनयकारौ भवताम् |
| **श्रुतम्** | = | आकर्णितं ज्ञानम् |
| **मा प्रहासीः** | = | मा त्यज |
| **अनेन अधीतेन** | = | एतेन अध्ययनेन |
| **अहोरात्रान्** | = | रात्रिन्दिवम् |
| **संदधामि** | = | एवं करवाणि |
| **ऋतं** | = | श्रेष्ठशब्दवृन्दम् एव |
| **वदिष्यामि** | = | कथयिष्यामि |
| **सत्यं वदिष्यामि** | = | यथार्थं कथयिष्यामि |
| **तत्** | = | ब्रह्म |

| | | |
|---|---|---|
| **माम् अवतु** | = | मां रक्षतु |
| **वक्तारम् अवतु** | = | आचार्यं रक्षतु |
| **नः** | = | अस्मभ्यम् |
| **मित्रः** | = | (दिवसप्राणाधिष्ठाता च )मित्रदेवता |
| **शम्** | = | कल्याणप्रदः भवतु |
| **अर्यमा** | = | चक्षुः सूर्यमण्डलस्य च अधिष्ठाता |
| **शं भवतु** | = | कल्याणप्रदं भवतु |
| **बृहस्पतिः** | = | वाग्बुद्ध्यधिष्ठाता |
| **उरुक्रमः** | = | त्रिविक्रमरूपेण पदाधिष्ठाता विष्णुः |
| **ब्रह्मणे** | = | परमात्मस्वरूपिणे |
| **त्वम् एव प्रत्यक्षम्** | = | प्राणरूपेण ज्ञायमानं ब्रह्म अस्ति |
| **तत्** | = | ब्रह्म (सर्वशक्तिसम्पन्नः परमेश्वरः) |
| **माम् अवतु** | = | मम रक्षां करोतु |
| **अवतु वक्तारम्** | = | आचार्यस्य रक्षां करोतु। शान्तिस्वरूप परमेश्वर त्रिविधतापान् शमयतु |
| **नौ** | = | आवयोः , गुरुशिष्ययोः |
| **सह अवतु** | = | सहैव रक्षां करोतु |
| **भुनक्तु** | = | पालनं करोतु |
| **वीर्यं** | = | शक्तिम् |
| **करवावहै** | = | आप्नुयाव, प्राप्तं करवाव |
| **अधीतम्** | = | पठितम् (ज्ञानम्) |
| **मा विद्विषावहै** | = | आवां परस्परं द्वेषं न करवाव |
| **शान्तिः शान्तिः शान्तिः** | = | आधिभौतिक-आधिदैविक-आध्यात्मिक विघ्नानां निवृत्तिः भवतु इत्याशयेन शान्तिपदं त्रिवारं प्रोक्तम्। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. अस्य पाठस्य प्रथममन्त्रः कस्माद् ग्रन्थाद् उद्धृतोऽस्ति –

(क) ऐतरेयोपनिषदः शान्तिपाठात्　　(ख) तैत्तिरीयोपनिषदः शान्तिपाठात्

(ग) कठोपनिषदः शान्तिपाठात्　　(घ) ऋग्वेदस्य प्रथममण्डलतः　　(　)

२. अस्य पाठस्य प्रथममन्त्रस्य ऋषिः कः अस्ति ?

(क) संवननः　　(ख) मेधातिथिः

(ग) विश्वामित्रः　　(घ) अङ्गिरा　　(　)

३. ओङ्कारपदस्य अर्थः कः ?

(क) मोक्षः (ख) ब्रह्मसेवकः

(ग) सच्चिदानन्दः (घ) अभिषेकः ( )

४. ॐ सह नाववतु वाक्ये 'नौ' पदस्य अर्थः कः?

(क) नावौ (ख) नद्यौ

(ग) शिवरामौ (घ) गुरुशिष्यौ ( )

## अतिलघूत्तरात्मक प्रश्नाः –

१. 'दाशुषे' इत्यस्य पदस्य अर्थः कः ?

२. तेजस्वि किं अस्तु ?

३. अहं किं वदिष्यामि ?

४. त्वमेव कीदृशं ब्रह्मासि ?

५. मम वाणी कुत्र प्रतिष्ठिता भवतु ?

## लघूत्तरात्मक प्रश्नाः –

१. प्रथममन्त्रस्य संस्कृतव्याख्या कर्त्तव्या ?

२. द्वितीयमन्त्रस्य व्याख्या करणीया ?

३. अस्य पाठस्य सारः संक्षेपेण लेखनीयः ?

४. अनेन पाठानुसारेण के कान् च अवन्तु ?

## व्याकरणात्मक प्रश्नाः –

**१. अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेर्नामपि लेखनीयम् –**

| | सन्धिपदम् | विग्रहः | सन्धिर्नाम |
|---|---|---|---|
| (क) | वाङ्.मे | .................................. | ........................ |
| (ख) | नाववतु | .................................. | ........................ |
| (ग) | तन्मामवतु | .................................. | ........................ |
| (घ) | ब्रह्मासि | .................................. | ........................ |
| (ङ) | तद्वक्तारम् | .................................. | ........................ |

**२. अधोलिखितपदेषु उपसर्ग-प्रकृतिः प्रत्ययश्च लिखत-**

| | पदम् | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| (क) | प्रतिष्ठिता | ............... | .................. | ..................... |
| (ख) | मनसि | .................. | ................... | .................. |
| (ग) | ब्रह्मणे | .................. | ................... | .................. |

(घ) वक्तारम् .................. .................. ..................
(ङ) अधीतम् .................. .................. ..................
(च) संवदध्वम् .................. .................. ..................

३. **अधोलिखितपदेषु धातुः लकारः पुरुषः वचनञ्च लिखत-**

| **पदम्** | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|
| (क) एधि | ............ | .............. | .............. | .................... |
| (ख) भवतु | ............ | .............. | .............. | .................... |
| (ग) असि | ............ | .............. | .............. | .................... |
| (घ) भुनक्तु | ............ | .............. | .............. | .................... |
| (ङ) करवावहै | ............ | .............. | .............. | .................... |
| (च) अस्तु | ............ | .............. | .............. | .................... |

४. **निम्नलिखित पदानि प्रयुज्य वाक्यनिर्माणं कर्तव्यम् -**

(क) वाक् - ................................................................................ ।
(ख) भुनक्तु - ................................................................................ ।
(ग) वदिष्यामि - ................................................................................ ।
(घ) अमृतम् - ................................................................................ ।
(ङ) माम् - ................................................................................ ।

५. **निम्नलिखित वाक्येषु वाच्यपरिवर्तनं करणीयम् -**

(क) अहं सत्यं वदिष्यामि = ....................................................................।
(ख) वरुणः सर्वान् रक्षति = ....................................................................।
(ग) भवान् विद्यालयं गच्छति= ....................................................................।
(घ) सः शान्तिं प्राप्नोति = ....................................................................।
(ङ) वयं संस्कृतं पठामः = ....................................................................।

**वस्तुनिष्ठप्रश्नाः - उत्तरमाला**

१ (क) २. (ग) ३. (ग) ४. (घ)

❀ ❀ ❀